# चरक सार संग्रह

सम्पादक

प्रो० एस० एन० सिंह



डॉ० अजय कुमार

डॉ० टीना सिंघल

चौखम्भा ओरियन्टालिया, वाराणसी

## कल्पस्थान

- तत्र दोषहरणमूर्ध्वभागं वमनसंज्ञकम्, अधोभागं विरेचनसंज्ञकम्, उभयं वा शरीरमलविरेचनाद्विरेचनसंज्ञां लभते ।।४।।
- तानि तु द्रव्याणि देश-काल-गुण-भाजन-संपद्वीर्यबलाधानात् क्रियासमर्थतमानि भवन्ति।।७।।
- मदनः करहाटश्च राढः पिण्डीतकः फलम् ।
श्वसनश्चेति पर्यायैरुच्यते तस्य कल्पना ।।२७।।

### द्वितीयोऽध्यायः

- कल्पं जीमूतकस्येमं फलपुष्पाश्रयं शृणु ।
गरागरी च वेणी च तथा स्याद्देवताडकः ।।३।।
जीमूतकं त्रिदोषघ्नं यथास्वौषधकल्पितम् ।
प्रयोक्तव्यं ज्वरश्वासहिक्काद्येष्वामयेषु च ।।४।।

### तृतीयोऽध्यायः

- सिद्धं वक्ष्याम्यथेक्ष्वाकुकल्पं येषां प्रशस्यते ।
लम्बाऽथ कटुकालबूस्तुम्बी पिण्डफला तथा ।।३।।
इक्ष्वाकुः फलिनी चैव प्रोच्यते तस्य कल्पना ।
कासश्वासविषच्छर्दिज्वरार्ते कफकर्षिते ।।४।।

### चतुर्थोऽध्यायः

- कर्कोटकी कोढफला महाजालिनिरेव च ।
धामार्गवस्य पर्याया राजकोशातकी तथा ।।३।।
गरे गुल्मोदरे कासे वाते श्लेष्माशयस्थिते ।
कफे च कण्ठवक्त्रस्थे कफसंचयजेषु च ।।४।।

### पञ्चमोऽध्यायः

- वत्सकः कुटजः शक्रो वृक्षको गिरिमल्लिका ।
बीजानीन्द्रयवास्तस्य तथोच्यन्ते कलिङ्गकाः ।।४।।
बृहत्फलः श्वेतपुष्पः स्निग्धपत्रः पुमान् भवेत् ।
श्यामा चारुणपुष्पा स्त्री फलवृन्तैस्तथाऽणुभिः ।।५।।
रक्तपित्तकफघ्नस्तु सुकुमारेष्वनत्ययः ।
हृद्रोगज्वरवातासृग्वीसर्पादिषु शस्यते ।।६।।

### षष्ठोऽध्यायः

- कृतवेधननामानि कल्पं चास्य निबोधत ।
क्ष्वेडः कोशातकी चोक्तं मृदङ्गफलमेव च ।।३।।
अत्यर्थकटुतीक्ष्णोष्णं गाढेष्विष्टं गदेषु च ।
कुष्ठपाण्ड्वामयप्लीहशोफगुल्मगरादिषु ।।४।।

## सप्तमोऽध्यायः ।

- विरेचने त्रिवृन्मूलं श्रेष्ठमाहुर्मनीषिणः ।
  तस्याः संज्ञा गुणाः कर्म भेदः कल्पश्च वक्ष्यते ।।३।।
  त्रिभण्डी त्रिवृता चैव श्यामा कूटरणा तथा ।
  सर्वानुभूति सुवहा शब्दैः पर्यायवाचकैः ।।४।।
  कषाया मधुरा रूक्षा विपाके कटुका च सा ।
  कफपित्तप्रशमनी रौक्ष्याच्चानिलकोपनी ।।५।।
- मूलं तु द्विविधं तस्याः श्यामं चारुणमेव च ।
  तयोर्मुख्यतरं विद्धि मूलं यदरुणप्रभम् ।।७।।

## अष्टमोऽध्यायः

- आरग्वधो राजवृक्षः शम्पाकश्चतुरङ्गुलः ।
  प्रग्रहः कृतमालश्च कर्णिकारोऽवघातकः ।।३।।
  ज्वरहृद्रोगवातासृगुदावर्तादिरोगिषु ।
  राजवृक्षोऽधिकं पथ्यो मृदुर्मधुरशीतलः ।।४।।
  बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे ।
  योज्यो मृद्वनपायित्वाद्विशेषाच्चतुरङ्गुलः ।।५।।

## नवमोऽध्यायः

- तिल्वकस्तु मतो लोध्रो बृहत्पत्रस्तिरीटकः ।
  तस्य मूलत्वचं शुष्कामन्तर्वल्कलवर्जिताम् ।।३।।

## दशमोऽध्यायः

- विरेचनानां सर्वेषां सुधा तीक्ष्णतमा मता ।
  सङ्घातं हि भिनत्त्याशु दोषाणां कष्टविभ्रमा ।।३।।
- पाण्डुरोगोदरे गुल्मे कुष्ठे दूषीविषार्दिते ।
  श्वयथौ मधुमेहे च दोषविभ्रान्तचेतसि ।।५।।
- सुतीक्ष्णैः कण्टकैरल्पैः प्रवरो बहुकण्टकः।
  स नाम्ना स्नुग्गुडा नन्दा सुधा निस्त्रिंशपत्रकः ।।८।।

## एकादशोऽध्यायः

- सप्तला चर्मसाह्वा च बहुफेनरसा च सा ।
  शङ्खिनी तिक्तला चैव यवतिक्ताऽक्षि(क्ष)पीडकः ।।३।।
  ते गुल्मगरहृद्रोगकुष्ठशोफोदरादिषु ।
  विकासितीक्ष्णरूक्षत्वाद्योज्ये श्लेष्माधिकेषु तु ।।४।।

## द्वादशोऽध्यायः

- दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः ।
  द्रवन्ती नामतश्चित्रा न्यग्रोधी मूषिकाह्वया ।।३।।
  (तथा मूषिकपर्णी चाप्युपचित्रा च शम्बरी ।
  प्रत्यक्श्रेणी सुतश्रेणी दन्ती र(च)ण्डा च कीर्तिता ।।)
  तयोर्मूलानि संगृह्य स्थिराणि बहलानि च ।
  हस्तिदन्तप्रकाराणि श्यावताम्राणि बुद्धिमान् ।।४।।
- तीक्ष्णोष्णान्याशुकारीणि विकाशीनि गुरूणि च ।
  विलाययन्ति दोषौ द्वौ मारुतं कोपयन्ति च ।।६।।
- विरुद्धवीर्यमप्येषां प्रधानानामबाधकम् ।
  अधिकं तुल्यवीर्ये हि क्रियासामर्थ्यमिष्यते ।।४५।।
- स्वरसैस्तुल्यवीर्यैर्वा तस्माद्द्रव्याणि भावयेत् ।
  अल्पस्यापि महार्थत्वं प्रभूतस्याल्पकर्मताम् ।।४८।।
- द्विगुणं तद्द्रवेष्विष्टं तथा सद्योद्धृतेषु च ।।९८।।
  यद्धि मानं तुला प्रोक्ता पलं वा तत् प्रयोजयेत् ।
  अनुक्ते परिमाणे तु तुल्यं मानं प्रकीर्तितम् ।।९९।।
- जलस्नेहौषधानां तु प्रमाणं यत्र नेरितम् ।
  तत्र स्यादौषधात् स्नेहः स्नेहात्तोयं चतुर्गुणम् ।।१०१।।
  स्नेहपाकस्त्रिधा ज्ञेयो मृदुर्मध्यः खरस्तथा ।
  तुल्ये कल्केन निर्यासे भेषजानां मृदुः स्मृतः ।।१०२।।
  संयाव इव निर्यासे मध्यो दर्वी विमुञ्चति ।
  शीर्यमाणे तु निर्यासे वर्तमाने खरस्तथा ।।१०३।।
  खरोऽभ्यङ्गे स्मृतः पाको, मृदुर्नस्तःक्रियासु च ।
  मध्यपाकं तु पानार्थे बस्तौ च विनियोजयेत् ।।१०४।।
  मानं च द्विविधं प्राहुः कालिङ्गं मागधं तथा ।
  कालिङ्गान्मागधं श्रेष्ठमेवं मानविदो विदुः ।।१०५।।